# सज्जनस्वभावः

1. उदये सविता रक्तो रक्तश्चास्तमये तथा ।
सम्पत्तौ च वित्तौ च महतामेकरूपता ।।

2. साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम् ।
नहि तापयतुं शक्यम् सागराम्बतृणोल्कया ।।

3. नारिकेनफलाकाराः दृश्यन्ते पि हि सज्जनाः ।
अन्ये बदरिकाकाराः बहिरेव मनोहराः ।।

5. सम्पदो महतामेव महतामेव चापदः ।
वर्धते क्षीयते चन्द्रो न तु तारागणः क्वचित् ।।

6. निर्गुणेष्वपि सत्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रस्तस्करवेश्मसु ।।

7. वित्ते त्यागः क्षमा शक्तौ दुःखे दैन्यविहीनता ।
निर्दंभता सदाचारः स्वभावोयं महात्मनां ।।

8. छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ।।

9. दोषजातमवधीर्य मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपनीय गृह्णते वारिधेः सलिलमेव वारिदाः ।।

10. चातकस्त्रिचतुरान् पयः कणान् याचते जलधरं पिपासया।
सो पि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता ।।

11. विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय ।।

12. श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्नतु कङ्कणेन ।
विभाति कायः खलु सज्जनानां परोपकारेण न चन्दनेन।।

13. तितिक्षिवः कारुणिकाः सुहृदः सर्वदेहिनां ।
अजातशत्रवः शान्ताः साधवः साधुभूषणः ।।

14. उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ।।